बोधायनवृत्तिकारभगवच्छ्रीपुरुषोत्तमाचार्यप्रणीता

पुरुषोत्तमप्रपत्तिः (प्रपत्तिषट्कम्)

रामिति बीजवान् नाथ ! मन्त्रराजो हि तारकः ।
तं जपामि तव प्रीत्यै पाहि मां पुरुषोत्तम ! ॥१॥
राम ! दीनोऽनुकूलोऽहं विश्वस्तोऽप्रातिकूल्यवान् ।
त्वयि न्यस्यामि चात्मानं पाहि मां पुरुषोत्तम ! ॥२॥
मामनाथं स्वशेषं च न्यासितं स्वार्थमेव हि ।
निर्भरं स्वभरत्वेन पाहि मां पुरुषोत्तम ! ॥३॥
यस्मिन् देहेऽहमानीतः कर्मणा स्वेन राघव ! ।
तदन्ते देहि सायुज्यं पाहि मां पुरुषोत्तम ! ॥४॥
न गतिर्जानकीनाथ ! त्वा विना परमेश्वर ! ।
परां गतिं प्रपन्नं त्वां पाहि मा पुरुषोत्तम ! ॥५॥
मोहितो मायया तेऽहं दैव्या गुणविशिष्टया ।
शरण्यं त्वां प्रपन्नोऽस्मि पाहि मां पुरुषोत्तम ! ॥६॥
बोधायनमहर्षिश्रीपुरुषोत्तमनिर्मितम् ।
प्रपत्तिषट्कमेतच्छ्रीभुक्तिमुक्तिप्रदायकम् ॥७॥

———o———